**स्व** न० स्वन—ड । १धने अमरः । २आत्मनि ३ज्ञातौ च पु० अमरः । ४आत्मीये त्रि० । आत्मनि आत्मीये चार्थेऽस्य सर्वनामता ।

**स्वकम्पन** पु० स्वेनैव पराप्रयुज्यमान एव कम्पते कपि—युच् । वायौ शब्दर० । [सदा” गीता

**स्वकर्म्मन्** न० स्वस्य कर्म । स्ववर्णोचिते कृत्ये “स्वकर्मनिरतः

**स्वकीय** त्रि० स्वस्येदम् छ कुक् च । आत्मीये । अत्र नित्य मेव कुक्, अकुक्युक्तप्रयोगस्तु अपाणिनीयः ।

**स्वग** सपर्णे भ्वा० प० सक० सेट् इदित् । स्वङ्गति अस्वङ्गीत् ।

**स्वगत** त्रि० स्वस्मिन् मनसि आत्मनि वा गतम् गम—क्त । १मनोगते २आत्मगते च । नाटकाभिनये प्रतिपाद्यपुरुषा श्राव्ये रङ्गभूमिस्थसामाजिकजनश्रवणयोग्ये वाक्ये न० । “अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्” सा०द० ।

**स्वगुप्ता** स्त्री स्वेनैव गुप्ता । १शूकशिम्ब्याम् शब्दर० । २ल-ज्जालुलतायाञ्च राजनि० ।

**स्वगृह** पुंस्त्री० स्वकृतं गृहं यस्य । १कलिङ्कारखगे जटा० हेम० । २निजमन्दिरे ३निजराशौ च ज्यो० ।

**स्वच्छ** त्रि० सुष्ठु अच्छः प्रा० । १अतिनिर्मले कालुष्यरहिते २मुक्तायां ३स्फटिके च पु० राजनि० । ४श्वेतदूर्वायाम् स्त्री राजनि० । ५विमलोपरसे न० हृद्रोगवियुते त्रि० शब्दर० । ७मुक्ते च । [अमरः ।

**स्वच्छन्द** त्रि० स्वस्य छन्दोऽभिप्रायः स्वच्छे यस्य । स्वाधीने

**स्वच्छपत्र** न० स्वच्छं पत्रं यस्य । अभ्रके हेमच० ।

**स्वच्छमणि** पु० कर्म० । स्फाटिके मणौ राजनि० ।

**स्वच्छबालुक** न० स्वच्छा बालुकेव यत्र । विमलोपरसे राजनि० ।

**स्वज** न० स्वस्मात् देहात् आत्मनो वा जायते । १रुधिरे मेदि० ३पुत्रे पु० ४कन्यायां स्त्री मेदि० । ५आत्मजाते त्रि० ।

**स्वजन** पु० स्वस्यैव जनो जननमेककुले यस्य । १ज्ञातौ अमरः । हेम० । २आत्मसम्बन्धिलोके । [यति-ते अपिस्वठत्—त ।

**स्वठ** गतौ संस्कारेऽसंस्कारे च चु० उ० सक० सेट् । स्वठ-

**स्वतन्त्र** त्रि० स्वस्य तन्त्रं वशीकारः सूत्रत्वे यस्य । १स्वाधीने अपराधीने अमरः । तत्त्वञ्च इतरव्यापारानधीनव्यापार-वत्त्वम् । २कर्त्तरि च स हि समभिव्याहृतक्रियाकारकान्त-रानधीनव्यापारवान् इति शाब्दिकाः “स्वतन्त्रः कर्त्ता” पा० कर्त्तृशब्दे १७१६ पृ० दृश्यम् ।

**स्वतस्** अव्य० स्व+तसिल् । आत्मतः इत्यर्थे ।

**स्वता** स्त्री स्वस्य स्वकीयस्य भावः तल् । स्वकीयत्वे “कामः स्वतां पश्यति” शकुन्तला ।

**स्वतोग्राह्य** न० स्वग्राहकसामग्रीग्राह्ये ज्ञानप्रामाण्ये वेदा-न्तादिमतम् “प्रामाण्यं न स्वतोग्राह्यं संशयानुपपत्तितः” भाषा० उक्तेर्न तत् स्वतोग्राह्यमिति न्यायमतम् ।

**स्वत्व** न० स्वस्य भावः त्व । द्रव्याणां यथेष्टक्रयविक्रयादिक्रि-यासु विनियोजके १धर्मभेदे २स्वामित्वे च, तच्च सम्बन्ध-भेदेन द्रव्यगतमात्मगतञ्च । स्वत्वपदार्थस्तु दायभा०टीकायां श्रीकृष्णतर्कालङ्कारेण निरूपितो यथा

“स्वत्वञ्च यथेष्टविनियोगार्हत्वेन शास्त्रबोधितत्वमिति प्राञ्चः । अतिरिक्तः पदार्थ इति शिरोमणिः । स्वामि-त्वञ्च तन्निरूपकत्वं निरूपकतया तदेव वा तच्च द्रव्यगतं गुणगतञ्च द्रव्यस्य दानादिश्रुतेः नीलं वा वृषमुत्सृजे-दित्यादौ लोहित्यादिगुणविशिष्टपारिभाषिकनीलवृषोत्-सर्गश्रुतेश्च । वस्तुतस्तु आत्मसमवेतं स्वामित्वमतिरिक्तः पदार्थः विक्रयदानादीनां तन्नाशकत्वे तद्धेतुत्वे च सम्ब-न्धाभावात् तदेव निरूपकतया स्वत्वव्यवहारहेतुः विष-यतया ज्ञाततावत् । अतएव निबन्धादौ भाविन्यपि स्वत्वम् अन्यथा प्रतिमासं प्रतिवर्षं वा देयत्वेन प्रति-श्रुतस्य धान्यादिरूपस्य भावित्वेन तत्र तदुत्पत्त्यनुप-पत्तेरिति चूडामणिसम्मतोऽयं लीलावतीरहस्यविदः समी-चीनः पन्थाः ।

तच्च स्वत्वं लौकिकमिति मिता० व्यवस्थापितं यथा

“स्वत्वमेव तावन्निरूप्यते किं शास्त्रैकसमधिगम्यं स्वत्वमुत प्रमाणान्तरसमधिगम्यमिति । तत्र शास्त्रैकसमधिगम्य-मिति तावद्युक्तं गौतमवचनात् । ‘स्वामी रिक्थक्रयसं-विभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रि-यस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति” प्रमाणान्तर-गम्ये स्वत्वे नेदं वचनम् । तथा स्तेनातिदेशे मनुः “योऽदत्तादायिनो हस्तात् लिप्सेत ब्राह्मणो धनम् । या-जनाध्यापनेनापि यथा स्तेनस्तथैव सः” इत्यदत्तादायिनः सकाशात् याजनादिकरणेन द्रव्यमर्जयतां दण्डविधान-मनुपपन्नं स्यात् स्वत्वस्य लौकिकत्वे । अपि च । लौकिकं चेत् स्वत्वं मम स्वमपहृतमनेनेति न ब्रूयात् अपहर्त्तुरेव स्वत्वाद्यथान्यस्य स्वत्वेनापहृतमिति नाप-हर्त्तुः स्वम् । एवं तर्हि सुवर्णरजतादिस्वरूपवद्दस्य वा स्वमन्यस्य वा स्वमिति संशयो न स्यात् तस्माच्छास्त्रैक-समधिगम्यं स्वत्वमिति । अत्रोच्यते । लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत् । आह-वनीयादीनां हि शास्त्रगम्यानां न लौकिकक्रियासाध-